**दिनाङ्क :- 31.08.2024** **सायम् - 06:20**

**इयम् आकाशवाणी**

**सम्प्रति वार्ता: श्रूयन्ताम्**

**<u>आदौ-मुख्यवार्ता:</u>**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य जनपद-न्यायपालिकाया: राष्ट्रियसम्मेलनस्य उद्घाटनं कृतवान् ; उक्तवान् च यत् महिला: विरुद्ध्य अत्याचारसम्बद्धेषु प्रकरणेषु निर्णया: यथाशीघ्रं भवेयु:।
- प्रधानमन्त्री नरेन्द्रमोदी अद्य दृश्यश्रव्य-संवादतन्त्रेण त्रिभ्य: वन्देभारत-रेलयानेभ्य: हरितध्वजं प्रदर्शितवान्।
- लाओसे भारतीय-दूतावासेन अन्तर्जालीय-प्रवञ्चना-केन्द्रेषु अवरुद्धाः सप्तचत्वारिंशत्-भारतीयाः नागरिकाः परित्राताः।
-  न्ध्रप्रदेशे मूसलाधार-वृष्टेः कारणात् राज्यस्य विभिन्नेषु क्षेत्रेषु जन-जीवनं पर्याकुलितं जातम् ; गुजराते वृष्टौ न्यूनतायाः अनन्तरं जलाप्लाव-स्थिति: सामान्या भवति।
- पेरिसे अनुवर्तमानासु पैरालम्पिक-क्रीडासु अद्य रात्रौ भारतस्य प्रवीण-कुमारः शल्यक्षेप-स्पर्धायाः निर्णायके चक्रे श्रेष्ठं प्रदर्शनं विधाय पदकम् अर्जितुं यथाशक्ति प्रयतिष्यते।

-------------------------

**<u>प्रधानमन्त्री न्यायपालिका</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् महिलासु अत्याचार: बालकानां सुरक्षा च समाजाय गभीरचिन्ताया: विषयो वर्तते। असौ अद्य नवदिल्ल्या: 'भारतमण्डपम्' इत्यत्र जनपद-न्यायपालिकाया: द्विदिवसीय-राष्ट्रियसम्मेलनस्य उद्घाटनानन्तरम् एतद् उक्तवान्। श्रीमोदी एतदपि उक्तवान् यत् यथाशीघ्रं महिला: विरुद्ध्य अत्याचारसम्बद्धेषु प्रकरणेषु निर्णया: विधास्यन्ते, तदैव महिलानां सुरक्षापि सुनिश्चिता भविष्यति।

श्रीमोदिना प्रोदीरितं यत् सर्वोच्चन्यायालयस्य पञ्चसप्तति-वर्षाणि लोकतन्त्रस्य जननीरूपेण भारतस्य गौरवं संवर्धयन्ति। तेनोक्तं यत् सर्वोच्च-न्यायालयस्य पञ्चसप्तति-वर्षाणि भारतस्य संविधानस्य तस्य सांवैधानिक-मूल्यानां च यात्रा वर्तते। असौ कथितवान् यत् भारतस्य जना: कदापि सर्वोच्चन्यायालयं भारतीयन्यायिक-प्रणालीं च प्रति प्रश्नं न उत्थापितवन्त:। अनेन प्रोक्तं यत् भारतीयलोकतन्त्रे न्यायपालिका-संविधानस्य रक्षकत्वेन मन्यते। प्रधानमन्त्रिणा कथितं यत् एतेषां विधीनां भावना 'नागरिक: प्रथम:, सम्माननं प्रथमं, न्याय: प्रथम:' इति वर्तते। अस्मिन् अवसरे प्रधानमन्त्री सर्वोच्चन्यायालयस्य स्थापनाया: पञ्चसप्तति-वर्षपूर्त्यवसरे प्रैषचिटिकाया: नाणकस्य च लोकार्पणं कृतवान्। स्वीये सम्बोधने भारतस्य मुख्य-न्यायाधीश: न्यायमूर्ति: डी.वाई.-चन्द्रचूड: उक्तवान् यत् सम्मेलनमिदं अस्मिन् वर्षे मार्चमासे कच्छनगरे आयोजितस्य अखिलभारतीय-जनपद-न्यायधीश-सम्मेलनस्य परिणामो वर्तते।

--------------------------

**<u>प्रधानमन्त्री वन्दे भारतम्</u>**

प्रधानमन्त्री नरेन्द्रमोदी अद्य दृश्यश्रव्य-संवादतन्त्रेण त्रिभ्य: वन्देभारत-रेलयानेभ्य: हरितध्वजं प्रदर्शितवान्। एतानि वन्देभारत-रेलयानानि सन्ति - मेरठत: लखनऊनगरं प्रति, मदुरईत: बेङ्लुरुस्थानकं प्रति अथ च चेन्नईत: नागरकोइलं प्रति। अस्मिन् अवसरे श्रीमोदिना कथितं यत् उत्तरत: दक्षिणं यावत् देशस्य विकासयात्रायां एक: नूतनाध्याय: योजित:। तेनोक्तं यत् वन्देभारत-रेलयानानां विस्तारेण सह देश: विकसित-भारतस्य लक्ष्यं प्रति अग्रेसरति। प्रधानमन्त्री उक्तवान् यत् एतानि त्रीणि वन्देभारत-रेलयानानि महत्वपूर्णानि ऐतिहासिकानि नगराणि परस्परं संयोजयिष्यन्ति। असौ कथितवान् यत् वन्देभारतम् आधुनिक-भारतीय-रेलयानस्य नूतनं मुखं वर्तते। प्रधानमन्त्रिणा कथितं यत् इदानीं अशेषेऽपि देशे द्व्यधिकैकशत-वन्देभारतरेलयानानि चलन्ति,

याभि: यात्रा सुखदा भवति। रेलमन्त्री अश्विनी-वैष्णव: उक्तवान् यत् षड्विंशत्यधिक-त्रिशताधिकैक-सहस्र-रेलस्थानकानां पुनर्निर्माणं क्रियते।

-------------------------

**प्रधानमन्त्री-सिङ्गापुर**

प्रधानमन्त्री नरेन्द्रमोदी मङ्गलवासरे ब्रुनेई-सिङ्गापुरयो: त्रिदिसवीय-यात्रायै प्रस्थानं करिष्यति। नवदिल्ल्यां वार्ताहरान् संसूचयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जायसवाल: उक्तवान् यत् प्रधानमन्त्री मोदी ब्रुनेई-देशस्य सुल्तान-हाजी-हसनल-बोल्किया इत्येतस्य निमन्त्रणम् अभिलक्ष्य आगामिमासे तृतीये दिवसे ब्रुनेई-दारुस्सलाम इत्यत्र गमिष्यति। असौ प्रोदीरितवान् यत् एषा कस्यापि भारतीय-प्रधानमन्त्रिण: अस्य देशस्य प्रथमा द्विपक्षिक-यात्रा भविष्यति। श्रीजायसवालेन संसूचितं यत् स्वयात्राया: द्वितीये चरणे श्रीमोदी सिङ्गापुरस्य प्रधानमन्त्रिण: लॉरेंस्- वोंग् इत्येतस्य निमन्त्रणम् अभिलक्ष्य बुधवासरे सिङ्गापुरं सम्प्राप्स्यति।

-------------------------

**उपराष्ट्रपति:**

उपराष्ट्रपति: जगदीप-धनखड: उत्तराखण्डस्य द्वि-दिवसीय-यात्रायै प्रतिष्ठते। असौ देहरादून-नगरे भारतीय-शिलातैलीय-संस्थानस्य वैज्ञानिकै:, अध्यापकै: विद्यार्थिभि: च सह संवादम् आचरिष्यति। श्रीधनखड: देहरादूने राष्ट्रिय-भारतीय-सैनिक-महाविद्यालयम् अथ च ऋषिकेशे अखिलभारतीयायुर्विज्ञान-संस्थानम् अपि गमिष्यति। असौ तत्र संस्थानस्य विद्यार्थिभि: अध्यापकै: च सह संवादं करिष्यति।

-------------------------

**जीतनराम माझी**

सूक्ष्म-लघु-मध्यमोद्यम-मन्त्री जीतनराम-माझी अद्य नवदिल्लयाम् अस्य वर्षस्य खादी-महोत्सवस्य समीक्षोपवेशनं कृतवान्। खादी-ग्रामोद्योगायोग: देशे

खादी-संवर्धनाय अस्य वर्षस्य अक्टूबर-मासे अस्य महोत्सवस्य आयोजनं करिष्यति। उपवेशने श्रीमाझी खादी-ग्रामोद्योग-क्षेत्रस्य प्रदर्शनस्यापि समीक्षां कृतवान्। असौ योजनानां कार्यान्वयन-माध्यमेन अस्मिन् क्षेत्रे कृतप्रयासेषु तीव्रताम् आनेतुं बलं प्रदत्तवान्।

-------------------------

**लाओसः/भारतीयाः परित्राताः**

लाओसे भारतीय-दूतावासेन बोकेओ-प्रान्तस्य गोल्डन-ट्राइंगल-विशेषार्थिकक्षेत्रे एस्.ई.जेड्.इत्यत्र स्थितेषु अन्तर्जालीय-प्रवञ्चना-केन्द्रेषु अवरुद्धाः सप्तचत्वारिंशत्-भारतीयाः नागरिकाः परित्राताः। एकेन सामाजिकान्तर्जाल-पटलीयेन सन्देशेन दूतावासः एतद्विषये असूचयत्।

-------------------------

**तेलङ्गाना /वृष्टिः**

बङ्गालखातेः उपरि वायोः अल्पापीड-क्षेत्र-कारणात् आन्ध्रप्रदेशे मूसलाधार-वृष्टिः भवति। गतरात्रेः जायमानायाः वृष्टेः कारणात् राज्यस्य विभिन्नेषु क्षेत्रेषु जन-जीवनं पर्याकुलितं जातम्। नगरेषु मार्गाः जलपूरिताः सन्ति। अधोवर्ति-क्षेत्राणि जलमग्नानि जातानि। कुल्यासु जलधारासु च जलस्तरे वृद्धिः अभवत्। अशेषे अपि राज्ये जनपद-प्रशासनेन अद्य विद्यालयेषु अवकाशः घोषितः। जलाप्लाव-कारणात् वाहनानां गमनागमनं प्रबाधितं जातम्। अत्रान्तरे, अनुवर्तमानां प्रचण्डवृष्टिम् अभिलक्ष्य तेलङ्गानायां ऋतुविज्ञान-विभागेन रक्तवार्णिकी सञ्चेतना प्रसारिता।

-------------------------

**गुजरातम्/वृष्टिः**

गुजराते वृष्टौ न्यूनतायाः अनन्तरं जलाप्लाव-स्थितिः सामान्या भवति। जलाप्लाव-प्रभावितेषु जनपदेषु साहाय्योद्धार-कार्यम् अपि अवसानं गतम्। कच्छ-

सौराष्ट्रयोः कतिपय-भागान् विहाय, राज्यस्य कस्मिन् अपि क्षेत्रे विगतासु चतुर्विंशतिषु होरासु घनासार-वृष्टिः न जाता।

--------------------------

**<u>पैरालम्पिक-क्रीडाः</u>**

पेरिसे अनुवर्तमानासु पैरालम्पिक-क्रीडासु अद्य रात्रौ भारतस्य प्रवीण-कुमारः शल्यक्षेप-स्पर्धायाः निर्णायके चक्रे श्रेष्ठं प्रदर्शनं विधाय पदकम् अर्जितुं यथाशक्ति प्रयतिष्यते। अद्य तृतीये दिने अपि लक्ष्यवेधकेषु आशा वर्तते। अद्य अनेकविधाः बैडमिंटन्-शरसन्धान-प्रतिस्पर्धाः आयोजयिष्यन्ते। लक्ष्यवेध-स्पर्धायां पुरुषाणां दश-मीटर्-एयर्-राइफल्-एस्.एच्.वन्-इत्यस्याः स्पर्धायाः अर्हताचक्रे अद्य भारतस्य महावीर-उनहल्करः प्रतिभा-प्रदर्शनं करिष्यति। अपरतः महिलानां दश-मीटर्-एयर्-राइफल्-एस्.एच्.वन्-समान-स्पर्धायाः अर्हताचक्रे रूबीना-फ्रांसिसः स्पर्धिष्यते।

**।। इति वार्ताः।।**